संस्कृत-वार्ता:

30.11.2025

सायम् - 06:20

<u>मुख्यवार्ता:</u>

· प्रधानमन्त्री नरेन्द्रमोदी उक्तवान् यत् हैदराबादनगरे विश्वस्य बृहत्तमम् विमानरक्षणस्य, ओवरहाल् लीप इंजन एमआरओ-सौविध्यस्य उद्घाटनम् वा भारतीय-नौसेनायाम् आई एन एस माहे इत्याख्यस्य योजनं भारतस्य नवीनं चिन्तनं, नवोन्मेषं, युवा-शक्तिं च प्रतिबिम्बयति।

· आकाशवाण्याः मन की बात इति कार्यक्रमे श्री मोदिना उक्तं यत् भारतेन पञ्चत्रिंशत्कोट्यधिकसप्तलक्षटनमितस्य धान्यस्य उत्पादनेन सह ऐतिह्यं कीर्तिमानं समुपस्थापितम्।

· निर्वाचनायोगेन द्वादश राज्येषु, केन्द्र शासित प्रदेशेषु च मतदातृ सूच्यानां विशेषगहनपुनरीक्षणस्य कार्यक्रमे पुनः संशोधनं कृतम् अस्ति।

· दिल्ली आरक्षिबलेन राष्ट्रिय-हेराल्ड्-प्रकरणमालक्ष्य सोनिया-गान्धी-राहुल-गान्धी उभयोः अन्येषां नेतृणां च विरुद्धं प्रथमा परिदेवना पुनः पञ्जीकृता।

· राच्यां भारतं विरुद्धं प्रथमा एकदिवसीया क्रिकेट क्रीडा प्रतिस्पर्धायां दक्षिण अफ्रीका दलेन पणकं विजित्य कन्दुकक्षेपणस्य निर्णय: विहिता।

<u>प्रधानमंत्री-मन की बात</u>

प्रधानमन्त्री नरेन्द्रमोदी उक्तवान् यत् अद्यतनीयाः घटनाक्रमाः भारतस्य नूतनं चिन्तनं, नवीनतां, युवाशक्तिं च प्रतिबिम्बयन्ति। आकाशवाण्याः मन की बात इति कार्यक्रमे श्री मोदी उक्तवान् यत् हैदराबादे विश्वस्य बृहत्तमस्य लीप् इञ्जन एमआरओ समवायस्य उद्घाटनं वा भारतीयनौसेनायाः मध्ये आईएनएस माहे इत्यस्य सम्मेलनं वा देशे स्काईरुट् इत्यस्य इन्फिनिटी परिसरस्य उद्घाटनं वा, एतानि सर्वाणि प्रमाणानि सन्ति। प्रधानमन्त्रिणा उक्तं यत् भारतेन

पञ्चत्रिंशत्कोट्यधिकसप्तलक्षटनमितस्य धान्यस्य उत्पादनेन सह ऐतिहासिकं कीर्तिमानं समुपस्थापितम्।

यत् कृषिक्षेत्रे महती उपलब्धिः अस्ति। श्री मोदी उक्तवान् यत् भारतेन शस्योत्पादने विगत दश वर्षेषु दशकोटिटनमितस्य वृद्धधिः कृतास्ति।

प्रधानमन्त्रिणा उक्तं यत् भारतस्य राष्ट्रमण्डलक्रीडानां नेतृत्वं भारताय गौरवास्पदं वर्त्तते। सः अवदत् यत् एते देशस्य देशवासिनां च उपलब्धयः सन्ति।

श्रीमोदी अवदत् यत् नवम्बर मासस्य षड्विंशे दिनाङ्के संविधानदिवममाधृत्य संसदः केन्द्रीय कक्षे विशेषकार्यक्रमस्य आयोजनं कृतम्। प्रधानमन्त्रिणा उक्तं यत् वन्दे मातरम् राष्ट्रीय गीतस्य पञ्चाशदधिकैकशततमवर्षपूर्त्यावसरे अशेष देशे कार्यक्रमाः आरब्धाः। सः अवदत् यत् अस्य मासस्य पञ्चविंशे दिनाङ्के अयोध्या नगर्याः राम-मन्दिरे धर्मध्वजारोहणं जातम्। तथा च तस्मिन् एव दिने कुरुक्षेत्रनगरस्य ज्योतिसर-नगरे पाञ्चजन्य स्मारकस्य अपि उद्घाटनं कृतम्।

श्री मोदी उक्तवान् यत् अयं मासः भारताय क्रीडा दृष्ट्या अतीव सफलः अभवत्। भारतीयमहिला क्रिकेट दलेन आईसीसी महिला विश्वकप इति स्पर्धा विजिता।

प्रधानमन्त्रिणा उक्तं यत् भारते शैत्यकाले पर्यटनस्य महती संभावनाः विद्यन्ते। सः अवदत् यत् शैत्यकालिकं पर्यटनं उत्तराखण्डे जनान् आकर्षयति। औली, मुनस्यारी चोप्ता, दियारा चेत्यादिनी स्थानानि लोकप्रियाः भवन्ति। श्री मोदी वोकल फॉर लोकल इति मंत्रमालक्ष्य जनेभ्यः समाह्वानं विहितवान् । असौ अवदत् यत् सः कतिपयदिनानि पूर्वं जी विंशतिः शिखरसम्मेलनावधौ वोकल फॉर लोकल इति मंत्रस्य आचरणाय जनेभ्यः समाह्वानं कृतवान् आसीत्।

आगामिमासस्य द्वितीये दिनांके काशी-नगर्याः नमो-घाट क्षेत्रे आरभमाणस्य चतुर्थ-काशी-तमिल-सङ्गमम्-इत्यस्य उल्लेखं कुर्वन् श्री मोदी उक्तवान् यत् अस्य वर्षस्य आयोजनस्य विषयः अतीव रोचकः अस्ति। तमिल सीखें - तमिल-कराकलम् इति।

प्राकृतिककृषिविषये आयोजिते सम्मेलने भागं ग्रहीतुं कोयम्बटूर नगरस्य यात्रायाः विषये वदन् श्री मोदी अवदत् यत् दक्षिण-भारते प्राकृतिक-कृषिमालक्ष्य प्रयासैः अतीव प्रभावितः जातः।

प्रधानमन्त्रिणा उक्तं यत् भारतं मधुनिर्माणे नूतनं कीर्तिमानं स्थापति। सः अवदत् यत् देशे मधुनिर्माणं गत एकादश वर्षेषु प्रायः द्विगुणं जातम्।

निर्वाचनायोग

निर्वाचनायोगेन द्वादश राज्येषु, केन्द्रशासितप्रदेशेषु च मतदातृ सूचीनां विशेषगहन पुनरीक्षण - एस आई आर इत्यस्य कार्यक्रमे संशोधनं विहितम्। आयोनेनानेन एस आई आर इत्यस्य समय सीमा दिसंबर-मासस्य एकादश दिनाङ्कं यावत् वर्धिता। मतदातृणां सूची दिसंबर-मासस्य षोडश दिनांकं यावत् प्रकाशिता भविता।

शीतकालीनसत्र

संसद: शीतकालीनसत्रात् पूर्वम् अद्य सर्वकारेण संसदभवने सर्वदलीयसभा समायोजिता। केन्द्रीयरक्षामन्त्री राजनाथ सिंह वर्यः सभायाः अध्यक्षत्वेन आसीत्। राज्यसभायाः सभाध्यक्षः जे.पी. नड्डाः, केन्द्रीयसंसदीयकार्यमन्त्री किरेन रिजिजुः, संसदीयकार्यराज्यमन्त्री अर्जुनराममेघवालः, डा. एल्. मुरुगन् च अस्यां सभायां उपस्थिताः आसन्। काङ्ग्रेस्-नेता गौरव गोगोल:, डी. एम्. के. नेता तिरुचि शिवा, टी. एम्. सी. नेता डेरेक ओ ब्रियान्, समाजवादीदलस्य नेता रामगोपाल यादवः, जे. डी. यू नेता सञ्जय झाः, टी. डी. पी. नेता लावु श्रीकृष्ण देवरायलुः, शिवसेना दलस्य नेता नरेश म्हस्के इत्यादयः सभायां उपस्थिताः आसन्। सभायाः अनन्तरं संसदीयकार्यमन्त्री किरेन रिजिजुः अब्रवीत् यत् सभेयं सकारात्मकरूपेण अभवत् इति। सः अवदत् यत्, सर्वकारेण सर्वेषां राजनैतिकदलानां नेतृभ्यः शीतकालसत्रावधौ उभयो सदनयोः सुलभ-कार्याचरणाय सौकर्यं प्रार्थितम् अस्ति।

अवधेयास्पदं वर्तते यत् शीतकालीन सत्रं श्वः आरभ्य दिसंबर-मासस्य नवदश दिनाङ्कपर्यन्तं प्रचलति।

नेशनल हेराल्ड

दिल्ली आरक्षिबलेन राष्ट्रिय-हेराल्ड्-प्रकरणमालक्ष्य सोनिया-गान्धी-राहुल-गान्धी उभयोः अन्येषां नेतृणां च विरुद्धं प्रथमा परिदेवना पुनः पञ्जीकृता। प्रवर्तन निदेशालयस्य परिवादस्य अनन्तरम्, नेशनल-हेराल्ड्-वृत्तपत्रस्य प्रकाशकेन एसोसिऐटड्-जर्नल्स्-लिमिटेड् (ए. जे. एल्.) इत्यस्य सम्पत्त्याः अधिग्रहणेन सम्बद्धं आपराधिक-षड्यन्त्रं, कपटम्, आपराधिक-विश्वासघातं च तेषां विरुद्ध्य आरोपितम्।

क्रिकेट

राच्यां भारतं  विरुद्धं प्रथमा-एकदिवसीयायां क्रिकेट्-क्रीडा-प्रतिस्पर्धायां दक्षिण अफ्रीका दलेन पणकं विजित्य कन्दुकक्षेपणस्य निर्णय: विहित:। प्रथमं क्रीडयता भारतीयदलेन दक्षिण-अफ्रीका दलं विरूद्धं  पंचाशदधिक  त्रिशत् धवनांका: विनिर्मिता:।

।। इति वार्ताः ।।